# कोडागर्वपरिहारः

डॉ. जयन्त नारळीकर, पुणे

अस्ति अमेरिकादेशस्य पूर्वाञ्चले न्यूजर्सीनामराज्ये बास्किंगरिजो नाम लघुजनपदः। तत्र मल्लिकानाम्नी बाला स्वपितृभ्यां स्वानुजेन च सह प्रतिवसति। अनेकानि क्रीडावस्तूनि पुत्तिकाः पशुप्रतिरूपाश्च तस्याः संग्रहे आसन्। तेषु सर्वेष्वपि प्रियस्तस्या आसीत् कोडाख्यः तथाकथितस्य भल्लुकस्य प्रतिरूपः। न खलु स पुत्तिका भल्लुकरूपे आसीत्। साऽसीत् मार्जारस्य प्रतिमा। परंतु मल्लिका तां मार्जाररूपेण न दृष्ट्वा भल्लुकरूपे अपश्यत्। किमर्थम् ? संक्षेपेण अयमस्ति तस्येतिहासः।

मल्लिकायाः पितरौ तस्यै अनेकानि कथापुस्तकानि वाचनार्थं दत्तवन्तौ। तेषु पुस्तकेषु एका लोककथा तामाकर्षत्। दक्षिणामेरिकायां समुत्पन्ना सा कथा कोडाख्यभल्लुकविषया आसीत्। आत्मनः सरलस्वभावेन कोडाभल्लुकः मल्लिकामाकर्षत्। कोडाकथां पुनः पुनः श्रोतुं सा पर्युत्सुका आसीत्। एकदा क्रीडनकानामापणे पितृभ्यां सह भ्रमन्ती सा टेडीबेअरसदृशानां पशुमूर्तीनां संग्रहे मार्जारप्रतिमामपश्यत्। अयं कोडासदृशो वर्तते इति मत्वा सा मातरम् अवदत् 'मम्मा देहि मे इमामेव मूर्तिकाम्। सा मम संगे कोडाभल्लुकरूपेण सततं विराजिष्यति।' तस्याः माता उवाच 'वत्से इयं तु नास्ति भल्लुकमूर्तिका... अयमस्ति मार्जारः। पश्य, अस्य श्मश्रु। अस्य लंबपुच्छं च। तुभ्यम् एकां भल्लुकमूर्तिकां कोडारूपेण दातुं नास्ति मे कोपि विरोधः।' तथापि मल्लिका स्वनिर्णयपरिवर्तनं कर्तुं नोत्सहते स्म। सा मार्जारप्रतिरूपमेव गृहीत्वा तं कोडानामधेयेन संबोधयन्ती भल्लुकरूपेणैव स्वगृहे स्थापितवती।

शश्वदेव तथाकथितः कोडाभल्लुकः मल्लिकायाः प्रियतमक्रीडनकपदमभूषयत्। रात्रौ निद्राधीनाऽपि सा बालिका कोडां स्वशय्यायां स्वनिकटेऽधारयत्। तस्या अन्ये सर्वेऽपि क्रीडनकाः कोडां प्रति असूयया पीडिताः आसन्। स्वस्वामिन्याः लालनेन असौ कोडाऽपि गर्वग्रस्तः सन्

इतराननादरेण तुच्छत्वेन च अपश्यत्। तानुद्दिश्य असौ इदमवदत्। 'इदमद्य मया लब्धं इमं प्राप्स्ये मनोरथम्। इदमस्तीदमपि मे भविष्यति पुनर्धनम्।। असौ मया जितः शत्रुः विजेष्ये चापरानपि। ईश्वरोऽहमहं भोगी सिद्धोहं बलवान् सुखी।। आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्ये मल्लिकाबहुलालितः।।'

मल्लिका खलु कोडाविरोधकानामाक्षेपानुपेक्षितवती। अतः असौ अधिकम् उन्मत्तः जातः। तस्य दर्पोक्तिभिः विचलिताः क्रीडनकाः मल्लिकासुहृदं खिस्टोफर रॉबिनम् उपदेशार्थं साहाय्यार्थं च प्रत्यागताः। तेषामावेदनं निशम्य तानाश्वासयन्नसौ उवाच 'अलं चिन्तया... अहं समुचितं कार्यक्रममायोजयिष्ये येन कोडागर्वपरिहारो मल्लिकामोहनाशश्च भविष्यति।'

चतुर्दिनानन्तरं मल्लिका पोस्टमार्गेण एकं सचित्रमामंत्रणपत्रं प्राप्तवती। प्रमुदिता सा मातरमपृच्छत् 'मम्मा! खिस्टोफर रॉबिनः मां मम क्रीडनकैः सह रविवासरे शतैकरवने वनभोजनार्थम् निमंत्रयते... किमहं गन्तुं शक्नोमि?' निमंत्रणपत्रं पठित्वा मल्लिकामाता उवाच 'बाढम्। अवश्यं गन्तुमर्हसि। पंचाधिकानि क्रीडापात्राणि नेतुं नाऽर्हसि' मल्लिका अवदत् 'साधु साधु मम्मा! अहं कोडां च अन्यानि चत्वारि पात्राणि मया सह नेष्यामि।'

रविवारे पंचक्रीडनकैः सह मल्लिका शतैकरवनप्रवेशद्वारे ख्रिस्टोफर रॉबिनमुपगता। असावपि स्वक्रीडनकैः सह तत्रोपस्थितः। तत्रापश्यत् मल्लिका पूः ऋक्षम्, टिग्गरं, व्याघ्रपुत्रम्, पिग्लेटाख्यं, लघुशूकरं, रू नाम पुत्रिकां कांगाम् उलूकवरम्, ससहोदरयूथम् शशकम् तथा च अन्यान् अनेकान् सुपरिचितान् क्रीडनकान्। एतेषां सुहृदां समागमेन मल्लिका तस्याः क्रीडनकाश्च परमं मोदमाजग्मुः।

शतैकरवनं प्रविश्य ख्रिस्टोफर रॉबिनः उवाच 'अत्र अस्माकं सम्मुखे द्वौ मार्गौ वर्तेते। पूर्वमार्गो बहुजनैः प्रयुक्तः रम्यं बालक्रीडास्थलं गच्छति। पश्चिममार्गस्तु महाविकटः साहसिकस्तु श्रूयते। तर्हि विचिनुमः मार्गमेकम्।'

'किं पश्चिममार्गे हेफ्फॅलंपः संभवति?' अपृच्छत् पिग्लेटः। 'यद्यसौ तत्र स्यात् तर्हि अहं तत्र गन्तुं नोत्सहे।'

'मा भैषीः.... वयं सर्वे त्वत्सुहृदः त्वया सह वर्तामहे। नैको हेफ्फॅलंपो त्वां बाधितुमर्हति' उवाच ख्रिस्टोफर रॉबिनः प्रहसन्।

'कोऽयं हेफ्फॅलम्पः? किमर्थमयं वराकस्तस्माद् बिभेति?' अपृच्छत् कोडा सपरिहासम्।

ख्रिस्टोफर रॉबिनः उवाच।

'हंत ते कथयिष्यामि हेफ्फॅलंपकथामिमाम्। मधुलोभेन ऋक्षोऽपि दुरवस्थां गतो यतः।।'

'कथमेतत्?' अपृच्छत् कोडा। 'मा वद! मा वद!' इति पूःऋक्षस्य विरोधम् उपेक्षमाणः ख्रिस्टोफर रॉबिनः कथामिमामकथयत्।

***

'गतवर्षे मया श्रुतं यदेको महागजः वनेऽस्मिन् विचरति तथा च तस्याक्रमणेन सर्वे वनचराः त्रस्ताः सन्ति। आंग्लभाषायां एलिफंट इति शब्देन ज्ञातः सः गजः मया बालसुलभेन अपभ्रंशेन 'हेफ्फॅलंपः' इति संबोधित आसीत्। अतः एते मम सुहृदः अपि तेनैव नाम्ना तं गजराजं जानन्ति। तदा हेफ्फॅलंपं बन्द्धुं मया एकं महाविवरं निर्मितम्। तस्मिन् विवरे गजमाक्रष्टुं कमपि स्वादिष्ठं खाद्यपदार्थं विवरतले निधातव्यमिति मया घोषितम्।

'मम घोषणां श्रुत्वा मम परमसुहृद् पूः भल्लुकः दातृत्वभावनया प्रेरितः तस्मै मधुपात्रम् अर्पयामास। असौ तत्पात्रं विवरतले निहितवान्।

'किन्तु रात्रौ क्षुधापीडितः पूः भल्लुकः तेनैव मधुपात्रेण आकृष्टः सन् विवरतलमासाद्य तस्मात्पात्रात् मधुपानमारभत। आदौ कतिपयानि एव मधुबिन्दूनि पातुं प्रवृत्तः सः वराकः मधुलोभेन स्वनिग्रहे असमर्थः सन् सम्पूर्णं पात्रं रिक्तं कृतवान्। तेनापि असंतुष्टः सन् असौ पात्रतले अवशिष्टान् मधुबिन्दून् अवलेढुं मुखं पात्रे निवेशयितुं यतवान्।

'अतिलोभो न कर्तव्यः इति सुभाषितस्य तथ्यं तेन सपदि अनुभूतम् खलु। मधुबिन्दूनामवशेषस्य अवलेहनोत्तरं यावदसौ पात्रात्स्वमुखं निष्कासयितुमयतत तावत् तेन अनुभूतं यत् तस्य शिरः पात्रमुखात् बहिरागन्तुं असमर्थम् आसीत्। पात्रेण च तस्य अक्षिणी अपि आवृते तावदसौ द्रष्टुमपि न अशक्नोत्।

'त्रायस्व माम् ! त्रायस्व माम् ! इति आक्रोशन्नसौ विवरतले इतस्ततः अभ्रमत्। तस्य चीत्कारान् निशम्य भयभीतो पिग्लेटस्तत्रागतः। किन्तु रात्रौ अंधकारे पात्रावृतशिरस्कं स्वमित्रं नाभिजानन्नसौ ततः पलाय्य मम आश्रयम् आगतः। शीघ्रमागच्छ... विवरे हेफ्फॅलंपो पतितस्सन्नाक्रोशति महारौद्रस्वरेण। असौ उवाच त्रस्तक्षुब्धमानसः। सपदि आवां विवरमासाद्य तमाक्रोशन्तं प्राणिनं दृष्टवन्तौ। तमभिजानन्नहमवदम् अयं नास्ति हेफ्फॅलंपः। अयं वराकः मम मुग्धः ऋक्षो विनी द पूः।

***

'एतत् श्रुत्वा प्रहसन् कोडा आह 'मूर्खोऽस्ति खलु पूः भल्लुकः मधुलोभभ्रष्टमतिः। अपि तु भो पिग्लेट! त्वं किमर्थं भैषीः ? कुत्रास्ति ते हेफ्फॅलंपः? अपि त्वं न जानासि यत् –

'अथ चेत्त्वमिदं रम्यं साहसं न करिष्यसि। ततः स्वधर्मं कीर्तिं च हित्वा लज्जामवाप्स्यसि।। अकीर्तिंचापि भूतानि कथयिष्यन्ति तेऽव्ययाम्। संभावितस्य चाकीर्तिः सर्वस्मादतिरिच्यते'।।

'प्रत्यवदत् पिग्लेटः 'महाजनो येन गतः स पन्थाः इत्यहं मन्ये... न च मन्ये संभावितमात्मानम्। अहमस्मि सामान्यो लघुशूकरः। अतः पूर्वमार्गम् एव वरिष्ये।'

'तथास्तु' इत्युक्त्वा ख्रिस्टोफर रॉबिनः पिग्लेटं कांगापुत्रं रूं च अन्यैः शावकैः सह क्रीडाविहारे कांगासंरक्षणे निधाय इतरैः सह चलितवान्। स्वशौर्यगर्वितः कोडा सर्वेषामग्रे आसीत्। हेफ्फॅलंपः स्यात् न वा स्यात् नाऽहं

कस्मादपिबिभेमि इति स: ख्रिस्टोफर रॉबिनं अन्यानि प्राणिमित्राणि च वारंवारमाश्वासयत्।

'तेषां पश्चिममार्गेण शताधिकपदेषु गतेषु वनपरिसर: श्वानभुभु:कारेण निनादित:। 'कुत: प्रवर्तते तद् बुक्कनम्? पृष्टवान् कोडा भयभीतस्वरेण।' ख्रिस्टोफर रॉबिन: उवाच 'इयम् अस्माकं सखी हीराशुनकी... साऽपि आमंत्रिता मया वनभोजनार्थम्।'

सपदि हीरा तत्र प्रकटीभूता। स्वसुहृद: मिलित्वा सा सुप्रसन्ना भुभु:कारेण सुहृदवलेहेन इतस्तत: कूर्दनेन च स्वहर्षम् अप्रकटयत्। सहसा पू: ऋक्ष: हीरां पृष्टवान् 'भद्रे अपि जानासि अस्माकं मित्रवरं कोडाम् ?' हीरा प्रत्युवाच 'नाऽहं जाने नैव जाने न जाने... कुत्रास्ति असौ? तं मिलितुम् अधीराऽस्मि।'

कुत्रास्ति कोडा ? सर्वे इतस्तत: प्रेक्षितवन्त:। सहसा टिग्गर: उत्प्लवमान: अघोषयत् 'दृश्यताम्... तत्र वृक्षोपरि वर्तते असौ वराक:। मल्लिका कोडां वृक्षादवतरितुमाह्वयत्। किन्तु भयभीतोऽसौ अवतरितुं नोत्सहते स्म। तदा ख्रिस्टोफर रॉबिन: उवाच' भद्र!

कुतस्त्वा कश्मलमिदं सहसा समुपस्थितम्। अनार्यजुष्टमस्वर्ग्यं हीराभयविनिर्मितम्। क्लैब्यं मा स्म गम: कोडे नैतत्वय्युपपद्यते। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप॥'

परंतु कोडा वृक्षादवतरितुं नेच्छति। तदा ख्रिस्टोफर रॉबिन: प्रहसन् उवाच 'मार्जार: शुन: बिभेति इति नैसर्गिकसत्यम् खलु।' एतत् श्रुत्वा मल्लिकया अनुभूतं यद् भल्लुकनामधेयेन अभिज्ञातोऽपि कोडा मार्जार एव अस्ति। सा तं सम्बोधयन्ती उवाच –

'शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक।
यस्मिन् कुले त्वमुत्पन्न: श्वानस्तत्र भयप्रद:॥
अत:परस्त्वं मम संग्रहे मार्जाररूपेणैव तिष्ठसि' इति।